# संस्कृतस्य भाषिकविविधता
# असमीयाभाषायां संस्कृतप्रभावः

**डॉ. अपूर्वशर्मा**
**वरिष्ठानुसन्धाता**
**संस्कृतसंवर्धनप्रतिष्ठानम्**

## उपोद्घातः

**ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**
**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥**[1]

'भाष्' इति धातोः 'भाषा' इति शब्दः निष्पद्यते, यस्यार्थः भवति प्रकाशकरणमिति। 'भास्' 'भाष्' च धातुद्वयं पृथक्तया वर्तते। भाषया एव सांसारिकः व्यवहारः सम्भवति। अतः कथितम् -

**वाचामेव प्रसादेन लोकयात्रा प्रवर्तते।**[2]

संस्कृतस्य महत्तापरिदृश्ये प्राथम्येन संसारस्य प्राचीनतमा भाषा, संस्कृतस्य सांस्कृतिकमहत्त्वम्, संस्कृतस्य अन्यभाषाभिः सह सम्बन्धः, यूरोपद्वारा समादृता भाषा, विदेशेषु संस्कृतसाहित्याध्ययनम्, वैदेशिकैः भारते कृतं संस्कृतस्य अध्ययनम्, संस्कृतस्य राजनैतिकमहत्त्वम्, राष्ट्रियैकतायाः आधारशिला चेति प्रभृतयः संस्कृतोपादेयतायाः अनेके सन्दर्भाः वर्तन्ते।

संस्कृतं साधन-साध्य-भेदेन द्विधा प्रयुज्यते। श्लोकभाषा अवगन्तव्या चेत् साध्यं, माध्यमभाषारूपेण उपयोगः चेत् साधनम्। अर्थात् आधुनिककाले संस्कृतशिक्षणव्यवस्थायां द्वयोः साध्यसाधनयोः समन्वयः आवश्यकः वर्तते। शिक्षणकर्त्रा आदौ उभयथा अपि अपेक्षितः अधिकारः सम्पादनीयः पश्चात् च क्रियमाणं शिक्षणमेव परिणामकारि भविष्यति। तदा संस्कृतं संस्कृतेन इति स्वप्नः पूर्णताम् आप्नुयात्।

माध्यमभाषात्वेन संस्कृतं साधनत्वेन स्वीक्रियते चेत् संस्कृतस्य व्यावहारिकं स्वरूपं समेषां पुरतः आयाति। किन्तु एतस्य अर्थः एवं नास्ति यत् संस्कृतस्य व्यावहारिकं स्वरूपं समाजे न वर्तते इति। विशेषतया भारतस्य सर्वासु भाषासु संस्कृतस्य पदानि बहुलतया विद्यन्ते। भारतीयभाषासु प्रायः प्रमाणकं सप्ततिप्रतिशतं पदानि संस्कृतभाषायाः एव सन्ति तत्समत्वेन तद्भवत्वेन वा। तत्रापि कानिचन तादृशानि पदानि सन्ति यानि सर्वे अपि जनाः जानन्ति अवगच्छन्ति च। यथा –

**सुखम्, दुःखम्, पापम्, पुण्यम्, मृत्युः, मार्गः, धर्मः, अधर्मः, नीतिः ......** इत्यादीनि।

हिन्दूजनानाम् नामानि प्रायः संस्कृतनामानि एव सन्ति। यथा –

**दीपकः, दिनेशः, मोहनः, अपूर्वः, लता, सीता, मोहिनी, भवानी....** इत्यादीनि।

एवमेव प्रत्येकमपि भारतीयः प्रत्यक्षत्वेन परोक्षत्वेन वा मन्त्रान् श्लोकान् वा श्रुतवन्तः एव। ततः अपि संस्कृतनामानि संस्कृतशब्दावली वा जनानां मस्तिष्के तिष्ठन्ति। अतः संस्कृतस्य व्यावहारिकस्वरूपं प्रायः सर्वे जानन्ति। संस्कृतस्य विषये काव्यादर्शे एवं प्राप्यते –

**तदेतद्वाङ्मयं भूयः संस्कृतं प्राकृतं तथा**
**अपभ्रंशाश्च मिश्रं चेत्याहुरार्याश्चतुर्विधम् ॥**
**संस्कृतं नाम दैवी वागन्वाख्याता महर्षिभिः**
**तद्भवस्तत्समो देशीत्यनेकः प्राकृतक्रमः ॥**[3]

---

1. ईशावास्योपनिषद्
2. काव्यादर्शः १/३
3. काव्यादर्शः १/३२-३३

भारतीयभाषासु एका प्रमुखा भाषा वर्तते **असमीया** इति । आधुनिकभारतस्य पूर्वप्रान्तस्य असमराज्यस्य प्रमुखा इयं भाषा । आधुनिकभाषापरिवारेषु बाङ्ग्ला, मैथिली, नेपाली, उडिया इत्यादिभिः भाषाभिः सह असमीयाभाषायाः निकटसम्बन्धः वर्तते । असमीयाभाषायाः लिपिः मूलतः ब्राह्मीलिप्याः एव विकसितं रूपम् अस्ति । अस्याः लिपेः प्राचीनतमरूपं ६१० ख्रीष्टाब्दस्य भास्करवर्मणः ताम्रपत्रेण ज्ञायते । ततः नागरीलिपिमाध्यमेन बहूनि परिवर्तनानि समागतानि । भाषायाम् अपि समयानुगुणं विभिन्नानि परिवर्तनानि समागतानि । अस्मिन् लेखे असमीयाभाषायां संस्कृतभाषायाः प्रभावस्य विश्लेषणं क्रियते तथा च संस्कृतभाषादृष्ट्या असमीयाभाषायाः स्वरूपं समेषां पुरतः उपस्थाप्यते ।

## असमराज्यस्य भाषीयं परिदृश्यम्

असमराज्यं विभिन्नजातिजनजातिभिः परिपूर्णं विद्यते । बहुभाषीये राज्येऽस्मिन् प्रमुखभाषात्वेन असमीया, बाङ्गला, बडोभाषा चेत्येवं भाषात्रयं विद्यते । तथापि राज्यभाषात्वेन ब्रह्मपुत्रोपत्यकायाम् असमीयाभाषा तथा च बराकोपत्यकायां बङ्गभाषा विद्यते । राज्यमिदं भारतवर्षस्य पूर्वप्रान्ते विद्यते ।

संस्कृतेन साकम् असमराज्यस्य निकटसम्बन्धः विद्यते । विशेषतः ज्योतिषशास्त्रेण सह सम्बन्धस्य विषये असमराज्यस्य प्राचीननाम्ना एव ज्ञायते । असमराज्यस्य प्राचीनं नाम 'प्राग्ज्योतितिःपुरम्' इति आसीत् ।

कालिकापुराणस्य संरचना दशमशताब्द्याम् अस्मिन्नेव प्रान्ते सञ्जाता । अत्रैव कामाख्यामन्दिरस्य निर्माणस्य वर्णनमपि प्राप्यते । अत्र अष्टनवतिः अध्यायाः तथा च नवसहस्रं श्लोकाः विद्यन्ते ।

संस्कृतभाषायाः चर्चाविषये प्राप्ताः शिलालिपयः एव संस्कृतभाषायां प्रचलनस्य प्रमाणीभूताः विद्यन्ते । तत्र भास्करवर्मणः शिलालिपयः अपि विद्यन्ते, याः संस्कृतभाषायाः तात्कालिकीं स्थितिं समीचीनतया दर्शयन्ति ।

असमराज्येऽपि गुरुकुलशिक्षाव्यवस्था प्रचलिता आसीत् इति महापुरुषस्य श्रीमतः शङ्करदेवस्य जीवनचरितात् ज्ञायते । एषः महापुरुषः 'माधवकन्दली' इति नाम्नः गुरोः सविधे अध्ययनं कृतवान् । संस्कृतभाषायां निष्णातः एषः महापुरुषः गुरुकुले पठनसमये एव सर्वादौ व्यञ्जनवर्णान् अधीत्यैव मात्राविहीनं पद्यं भगवतः विष्णोः स्तुतये अरचयत् । तत् एवं –

**करतल कमल कमल-दल नयन ।**

**भवदव दहन गहन वन शयन ।**

**नपर नपर पर सतरत गमय ।**

**सभय मभय भय ममहर सततय ।**

**खरतर वरशत हत दश वदन ।**

**खगचर नगधर फनधर शयन ।**

**जगदघ मपहर भवभय तरण ।**

**परपद लय कर कमलज नयन ।**[4]

यद्यपि अत्र संस्कृतविभक्तीनां प्रयोगः न दृश्यते तथापि एतेन ज्ञायते बाल्यकाले एव तेन निश्चयेन शास्त्राणि अधीतानि । प्राचीन-असमीयाभाषायाः स्वरूपमपि एवमेव आसीत् ।

माधवकन्दली चतुर्दशशताब्द्याः कछारीनृपतेः महामाणिक्यस्य राजसभायाः एकः प्रसिद्धः कविः आसीत् । माधवकन्दली चतुर्दशशताब्द्यां वाल्मीकिरामायणस्य अनुवादम् अकरोत् । सः हिन्दुधर्मे दीक्षितस्य राज्ञः महामाणिक्यस्य अनुरोधात् असमीयाभाषां

4. https://as.m.wikipedia.org

प्रति वाल्मीकिरामायणस्य अनुवादम् अकरोत् । ततः परमेव पञ्चदशशताब्द्याः द्वितीयार्धे कृत्तिवासीरामायणं तथा च षोडशशताब्द्याः अष्टमदशके तुलसीदासस्य 'रामचरित मानस' इति उत्तरभारते प्रसारितम् ।

महापुरुषेण माधवकन्दलिना विरचितस्य रामायणस्य काण्डद्वयं यदा नष्टं जातं तदा शङ्करदेवेन तथा च माधवदेवेन संस्कृतात् पुनः अनूद्य माधवकन्दलीरामायणे योजितम् । महापुरुषेण शङ्करदेवेन असमीयाभाषया (ब्रजावलीभाषया) रचितानि नाटकानि गीतानि च संस्कृतग्रन्थेभ्यः एव स्वीकृतानि । तेषु 'कालियादमन', 'केलिगोपाल', 'रुक्मिणीहरण', 'पारिजातहरण', 'रामविजय' चेत्यादीनि नाटकानि प्रमुखाणि विद्यन्ते । श्रीमद्भागवत्पुराणे वर्णितकथानाम् आधारेण 'कीर्तन' तथा च 'गुणमाला' इति ग्रन्थद्वयं पद्यरूपेण असमीयाभाषया तेन लिखितम् । एतेन ज्ञायते प्राचीनकाले असमराज्ये संस्कृतस्य बहुचर्चा विद्यते स्मेति ।

## असमीयाभाषायाः आधुनिकं प्रारूपम्

भाषिकसंरचनादृष्ट्या असमीया भाषा संस्कृतभाषया सह साम्यं भजति । यथा संस्कृतभाषा संयोगात्मिका तथैव असमीयाभाषा अपि संयोगात्मिका वर्तते । अर्थात् यथा संस्कृतशब्देषु विभक्तिचिह्नानि कारकचिह्नानि वा संलग्नानि भवन्ति तथैव असमीयाभाषायाम् अपि भवति । यथा –

### विभक्तिसन्दर्भे -

| | संस्कृतभाषायाम् | असमीयाभाषायाम् |
|---|---|---|
| प्रथमाविभक्तिः | रामः, सीता | राम, रामे, सीता, सीताइ (अ इ ए) |
| द्वितीयाविभक्तिः | रामम्, सीताम् | रामक्, सीताक्, फल (अ, क) |
| तृतीयाविभक्तिः | रामेण, सीतया | रामेरे, सीतारे, रामर् द्वारा, सीतार् द्वारा (रे, दि, द्वारा) |
| चतुर्थीविभक्तिः | रामाय, सीतायै | रामलै, सीतालै (अक् लै) |
| पञ्चमीविभक्तिः | रामात्, सीतायाः | रामर् परा, सीतार् परा (परा) |
| षष्ठीविभक्तिः | रामस्य, सीतायाः | रामर्, सीतार् (र्) |
| सप्तमीविभक्तिः | रामे, सीतायाम् | रामत्, सीतात् (त्) |

### असमीयाशब्दानां वर्गीकरणम् एवं कर्तुं शक्यते –

**१. उत्पत्तेः आधारेण अथवा स्रोतसाम् आधारेण ।**

**२. व्युत्पत्तेः आधारेण ।**

**३. अर्थस्य आधारेण ।**

**४. प्रयोगस्य आधारेण ।**

### उत्पत्तेः आधारेण अथवा स्रोतसाम् आधारेण ।

असमीयाभाषायां प्रयुक्ताः शब्दाः कुतः समागताः अथवा शब्दानां स्रोतः किम् इत्यस्य आधारेण शब्दानां वर्गीकरणं कर्तुं शक्यते । असमीयाभाषायाः शब्दानां स्रोतसः आधारेण पञ्चसु भागेषु विभक्तुं शक्यते । यथा – १. तत्समशब्दाः २. तद्भवशब्दाः ३. देशजशब्दाः ४. विदेशीशब्दाः ५. सङ्करशब्दाः

### असमीयाभाषायां तत्समशब्दाः –

तत्समः अर्थात् तत् + समः (तेन समः) । अर्थात् कस्याश्चित् भाषायाः साक्षात् तस्यैव शब्दस्य यथावत् उपयोगः तत्समः इति । असमीयाभाषायां संस्कृतभाषातः ये शब्दाः परिवर्तनं विना यथावत् प्रयुज्यन्ते ते शब्दाः तत्समाः इति कथ्यन्ते ।

- प्रायः संस्कृतस्य संज्ञापदानि असमीयाभाषायाम् अपि सन्ति । यथा –

| संस्कृतम् | असमीया | संस्कृतम् | असमीया |
|---|---|---|---|
| ग्राम | ग्राम | पक्षी | पक्षी |
| राज्य | राज्य | पशु | पशु |
| देश | देश | पिता | पिता |
| राष्ट्र | राष्ट्र | पुत्र | पुत्र |
| गुरु | गुरु | कन्या | कन्या |
| शिष्य | शिष्य | ग्रन्थ | ग्रन्थ |
| विद्यालय | विद्यालय | पुस्तक | पुस्तक |
| पर्वत | पर्वत | मार्ग | मार्ग |
| छात्र | छात्र | विमान | विमान |
| शिक्षक | शिक्षक | स्थान | स्थान |
| शिक्षिका | शिक्षिका | लता | लता |
| पाठ | पाठ | महिला | महिला |

- केचन संस्कृतस्य विशेषणशब्दाः असमीयाभाषायाम् अपि प्रयुज्यन्ते। यथा –

| संस्कृतम् | असमीया |
|---|---|
| सुन्दर | सुन्दर |
| उत्तम | उत्तम |
| निर्मित | निर्मित |
| स्वस्थ | स्वस्थ |
| प्राचीन | प्राचीन |
| श्रेष्ठ | श्रेष्ठ |
| सुगन्धित | सुगन्धित |

- संस्कृतस्य अव्ययपदानि असमीयाभाषायाम् अपि तत्समरूपेण वर्तन्ते –

| संस्कृतम् | असमीया |
|---|---|
| किन्तु | किन्तु |
| वारं वारम् | बार् बार् |
| प्रायः | प्राय |
| अन्यथा | अन्यथा |
| किम् | कि |
| प्रति | प्रति |
| इति | इति |

- संस्कृतस्य उपसर्गाणि असमीयाभाषायाम् अपि तत्समरूपेण वर्तन्ते –

| संस्कृतम् | असमीया |
|---|---|
| प्रकारः | प्रकार |

| | |
|---|---|
| पराजयः | पराजय |
| अपकारः | अपकार |

| | | | |
|---|---|---|---|
| संस्कारः | संस्कार | आकारः | आकार |
| अनुकरणम् | अनुकरण | निष्ठा | निष्ठा |
| अवमाननम् | अवमानना | अधिकारः | अधिकार |
| निष्कासनम् | निष्कासन | अत्यधिकः | अत्यधिक |
| निर्गमनम् | निर्गमन | अभिमतम् | अभिमत |
| दुस्साहसः | दुस्साहस | प्रतिकारः | प्रतिकार |
| दुर्दिनम् | दुर्दिन | परिष्कारः | परिष्कार |
| विकारः | विकार | उपकारः | उपकार |

**असमीयाभाषायां तद्भवशब्दाः –**

तद्भवः अर्थात् तत् + भवः । अर्थात् तस्मात् भवः इति । अर्थात् मूलभाषायाः तत्समशब्देषु परिवर्तनस्य आगमनात् परं तत् रूपं यत् अपरभाषायां प्रयुज्यते । असमीयायां तद्भवशब्दाः संस्कृतस्य तत्समशब्देभ्यः परिवर्त्य समागताः सन्ति ।

| संस्कृतम् | असमीया | संस्कृतम् | असमीया |
|---|---|---|---|
| ब्राह्मण | बामुन | शृगाल | शियाल |
| व्याघ्र | बाघ | नौका | नाव |
| चिल्लपक्षी | चिलनी | चक्षु | चकु |
| नासिका | नाक | स्वर्ग | सरग |
| कुक्कुट | कुकुरा | वक्ष | बुक |
| स्नेह | चेनेह | वानर | बान्दर |
| गर्भिणी | गाभिनी | गौ | गरु |
| मत्स्य | माछ | छाग | छागली |
| शाप | शाओ | पलायन | पलोवा |
| कुमार | कुवर | कदली | कल |
| नित्य | नितौ | कलस | कलह |
| कृष्ण | क’ला | लौह | लोहा |

➡ संस्कृतस्य क्रियापदानि असमीयाभाषायां तद्भवरूपेण सन्ति । यथा –

| संस्कृतम् | असमीया | | |
|---|---|---|---|
| खादति | खाइ | मारयति | मारे |
| हसति | हाहे | चरति | चरे |
| नमस्करोति | नमस्कार करे | याति | य़ाइ |
| मिलति | मिले | चिनोति | चिङे |
| नयति | निये | करोति | करे |
| पिबति | पिये | कथयति | कइ |
| गायति | गाइ | लिखति | लिखे |
| | | ददाति | दिये |

## असमीयाभाषायां वाक्यनिर्माणम् –

- सर्वनामपदानि वाक्यप्रयोगः च

| संस्कृतम् | असमीया |
|---|---|
| सः खादति। | सि खाइ।(सि – खि उच्चारणे) |
| ते खादन्ति। | तेओलोके खाइ। |
| सा खादति। | ताइ खाइ। |
| ताः खादन्ति। | तेओलोके खाइ। |
| अहं खादामि। | मइ खाओ। |
| वयं खादामः। | आमि खाओ। |

## 1. व्युत्पत्तेः आधारेण

व्युत्पत्तिः अर्थात् निर्माणप्रक्रिया। संस्कृतस्य व्युत्पत्तेः आधारेण असमीयाशब्दाः भागत्रये विभक्तुं शक्यन्ते।

१. रूढाः २. यौगिकाः ३. योगरूढाः

**१. रूढशब्दाः** – रूढाः अर्थात् प्रसिद्धाः। ये शब्दाः परम्परया कस्यापि विशेषार्थस्य कृते प्रसिद्धाः यथा –

| संस्कृतम् | असमीया |
|---|---|
| सुख | सुख |
| दुःख | दुख |
| पुरुष | पुरुष |
| स्त्री | स्त्री |
| पक्षी | पक्षी |
| पाप | पाप |
| पुण्य | पुण्य |
| शिक्षक | शिक्षक |
| छात्र | छात्र |
| बन्धु | बन्धु |
| पितृ | पिता |
| माता | मा |

**२. यौगिकाः** – एकाधिकशब्दैः निर्मिताः शब्दाः। येषाम् एकैकः खण्डः अपि भिन्नम् अर्थं बोधयति। ये शब्दाः तत्समाः तद्भवाः अपि भवन्ति। एतादृशाः शब्दाः समासकारणात् समागताः सन्ति। अतः यथा संस्कृते समासाः सन्ति तथैव असमीयायाम् अपि समासाः सन्ति। सामासकारणात् प्रादुर्भूताः केचन यौगिकशब्दाः यथा -

| संस्कृतम् | असमीया |
|---|---|
| हिमालय | हिमालय |
| चिकित्सालय | चिकित्सालय |
| नक्षत्रमण्डल | नक्षत्रमण्डल |
| कमलनयन | कमलनयन |
| क्रीडाङ्गण | क्रीडाङ्गण |

| | |
|---|---|
| पाठशाला | पाठशाला |

यथा संस्कृते प्रत्ययद्वारा, उपसर्गद्वारा, सन्धिद्वारा अपि शब्दाः निर्मिताः भवन्ति तथैव असमीयाभाषायाम् अपि यौगिकशब्दाः निर्मिताः भवन्ति। यथा –

| | |
|---|---|
| **प्रत्ययद्वारा** | |
| समाज + इक | सामाजिक |
| नगर + इक | नागरिक |
| रजाघर + ईय | रजाघरीय + टाप् – रजाघरीया |
| असम + ईय | असमीय + टाप् - असमीया |
| **प्रत्ययद्वारा {युवोरनाकौ (अष्टाध्यायी ७.१.१)}** | |
| णी + अन (ल्युट्) | नयन |
| गै + अक | गायक |
| पच् + अक (ण्वुल्) | पाचक |
| ग्रह् + अक (ण्वुल्) | ग्राहक |
| णी + अक (ण्वुल्) | नायक |
| **उपसर्गद्वारा** | |
| निर् + मल | निर्मल |
| परि + मान | परिमाण |
| अनु + मान | अनुमान |
| **सन्धिद्वारा** | |
| रमा + ईश | रमेश |
| हिम + आलय | हिमालय |
| अं + कुर | अङ्कुर |
| सर्व + आनन्द | सर्वानन्द |

३. **योगरूढाः** – एतादृशाः शब्दाः एकाधिकशब्दैः निर्मिताः निर्दिष्टे अर्थे प्रसिद्धाः च सन्ति। यथा –

| संस्कृतम् | असमीया |
|---|---|
| पङ्कज | पंकज |
| हिमालय | हिमालय |
| पीताम्बर | पीताम्बर |
| चतुर्भुज | चतुर्भुज |
| नीलकण्ठ | नीलकण्ठ |
| दशानन | दशानन |

## 2. अर्थस्य आधारेण

असमीयाभाषायाम् एकस्य अर्थस्य प्राप्तये कदाचित् एकस्य कदाचित् च बहूनां पदानां प्रयोगः दृश्यते यथा –

अश्वः – घोड़ा, अश्व        शुनकः – कुकुर

पत्र – चिठी, पत्र पुस्तक – पुस्तक, किताब

विद्यालय – विद्यालय, स्कुल

### 3. प्रयोगस्य आधारेण ।

प्रयोगस्य आधारेण असमीयाभाषायाम् अपि संस्कृतभाषावत् वीप्सार्थकशब्दाः सन्ति । यथा -

| संस्कृतम् | असमीया |
|---|---|
| वारं वारं | बार् बार् |
| शनैः शनैः | लाहे लाहे |
| मध्ये मध्ये | माजे माजे |

## प्राचीनायाम् असमीयाभाषायां संस्कृतस्य प्रभावः

असमीयाभाषायाः जननी संस्कृतभाषा अस्ति । असमीयाभाषायाः विकासः विभिन्नस्तरे जातः । तत्रापि प्राचीन-असमीयाभाषा अपि च आधुनिक-असमीयाभाषा इति । प्राचीन-असमीयाभाषायाम् अधिकतया संस्कृतभाषायाः प्रयोगः दृश्यते । एतस्य प्रमाणम् अधः प्रदत्तेभ्यः पद्येभ्यः प्राप्यते –

**महापुरुषस्य शङ्करदेवस्य जन्मविषये रामचरणठाकुरेण प्रणीतस्य गुरुचरितस्य कश्चन अंशः –**

पाछे एक दिन, असन्तोष मने शय्यात कैला शयन ।
परम सुन्दर, विप्र एकजन, स्वप्ने पाइला दरिशन ॥
ब्राह्मणे बोलन्त, शुनिओ कुसुम, चिन्ता देखो बहुतर ।
कैलो सारोत्तर, पुत्र पाइबा बर, अर्चा करा गोपेश्वर ॥
पाछे प्रभातत, बिप्ररु मिलया, बिप्रगणे प्रशंसिला ॥
कदली मध्यत, नव द्रव्य यत, स्भार लय अशेष ।
पाछे भार्या समे, आनन्दित मने, शिङ्गरि कैला प्रवेश ॥
करि स्नान दान, शुक्ल परिधान, प्रवेशि देव मन्दिर ।
प्रणति पूर्वक, स्तुति आरम्भिला, चित्तक करिया स्थिर ॥

एतेषु पद्येषु अधिकशब्दाः संस्कृतस्य तत्समाः तद्भवाः वा शब्दाः सन्ति यथा –

एक दिन, असन्तोष मने शय्यात शयन ।
परम सुन्दर, विप्र एकजन, स्वप्ने दरिशन ॥
ब्राह्मणे कुसुम, चिन्ता ।
सारोत्तर, पुत्र अर्चा गोपेश्वर ॥
प्रभातत, बिप्ररु मिलया, बिप्रगणे प्रशंसिला ॥

कदली मध्यत, नव द्रव्य अशेष ।
भार्या समे, आनन्दित मने, प्रवेश ॥
स्नान दान, शुक्ल परिधान, प्रवेशि देव मन्दिर ।
प्रणति पूर्वक, स्तुति आरम्भिला, चित्तक स्थिर ॥

प्राचीन-असमीयायाम् एव बरगीतानां रचना जाता महापुरुषेण शङ्करदेवेन माधवदेवेन च एतादृशानां गीतानां रचना कृता । एतेषु गीतेषु अपि संस्कृतपदानाम् आधिक्यं प्राप्यते । माधवदेवेन रचितम् एकं बरगीतं पश्यामः –

मोक देख ना केने ओहे जगन्नाथ मइ बर पापीर पापी ।
संसार कूपत परिया तोमार चरणे नधरो चापि ॥
देवे नाहि पाय मानवी हैवाक, मइ पापी आसिया पाइलो ।
तोमार भकति-अमिया त्यजिया बिषय-गरल खाइलो ॥
कत तपसाइ नरतनु पाइ गोवाइलौँ बिषय भोले ।
येन चिन्तामणि अमूल्य रतनि बिकाइलो काञ्चर मोले ॥
लोभ मोह काम क्रोध मद मान इसब बैरीर सङ्गे ।
आपोन इच्छाये पाप आचरिया बेराइलो मनत रङ्गे ॥

पर तिरी पर धनर आशाये सदाय आकुल भैलो ।
तुमि महा धन तोमाक नेसेबि जनम बिफल कैलो ॥
आयु आलेजाले गैल पाइले काले प्राण कोन दिन परे ।
यमर यातना शुनिया हृदय कम्पित भैगैल बरे ॥
तोमार अभय चरणे शरण बिने नाहि आन गति ।
तुमि दयामय जानिया कहय मादव मूरुखमति ॥

महापुरुषस्य शङ्करदेवस्य जन्म १३७१शताब्द्याः आश्विनमासस्य पञ्चमे दिनाङ्के शुक्लदशमीतिथौ शुक्रवासरे जातम् इति केषाञ्चन अभिमतम् । एतस्य अयम् आशयः यत् उपरि प्रदत्तानि पद्यानि तस्य समयस्य अभ्यन्तरे लिखितानि इति । अर्थात् तस्मिन् समये असमीयाभाषायाः स्वरूपं निश्चयेन एतादृशम् आसीत् । माधवदेवेन विरचितेषु पद्येषु अपि अधिकतया संस्कृतशब्दानां प्रयोगः दृश्यते । यथा –

ना जगन्नाथ पापीर पापी ।
संसार कूपत चरणे ॥
देवे नाहि पाय मानवी पापी ।
भकति-अमिया त्यजिया बिषय-गरल ॥
तपसाइ नरतनु बिषय ।
चिन्तामणि अमूल्य रतनि काञ्चर ॥
लोभ मोह काम क्रोध मद मान ।

इच्छाये पाप आचरिया मनत रङ्गे ॥
पर पर धनर आशाये सदाय आकुल ।
महा धन नेसेबि जनम बिफल ॥
आयु काले प्राण दिन परे ।
यमर यातना शुनिया हृदय कम्पित ॥
अभय चरणे शरण बिने नाहि गति ।
दयामय जानिया कहय माधव मूरुखमति ॥

एतेषु पद्येषु विद्यमानानि अधिकानि पदानि संस्कृपदानि एव सन्ति । एवमेव सम्पूर्णे असमीयासाहित्ये संस्कृतभाषायाः पदानि बहुलतया दरीदृश्यन्ते ।

## सारांशः

असमीयाभाषायाः अपि जननी संस्कृतभाषा एव इति उपरितनविश्लेषणेन सर्वैः अपि अवगन्तुं शक्यते । केवलं केषाञ्चन वर्णानाम् उच्चारणभिन्नतायाः कारणेन इयं भाषा संस्कृतात् भिन्ना इति प्रतीयते । अनया भाषया बहुविधानि साहित्यानि अपि संरचितानि । अस्याः साहित्यस्य इतिहासः पञ्चसु स्तरेषु विभक्तः दृश्यते ।

(१) वैष्णवपूर्वकाल: 1200-1449 ख्रीष्टाब्दः,
(२) वैष्णवकाल: 1449-1650 ख्रीष्टाब्दः,
(३) गद्येतिहासकाल: 1650-1926 ख्रीष्टाब्दः,
(४) आधुनिककाल: 1026-1947 ख्रीष्टाब्दः,
(५) स्वाधीनतोत्तरकाल: 1947 ख्रीष्टाब्दतः प्रचलति ।

सर्वविधम् अपि साहित्यं संस्कृतसाहित्यैः प्रभावितं वर्तते । सन्धिसमासप्रत्ययादीनां छन्दोऽलङ्काराणां प्रयोगः असमीयासाहित्ये अपि यथावत् दरीदृश्यते । अनेन एवं निर्णेतुं शक्यते यत् संस्कृतस्य प्रभावः न केवलम् असमीयाभाषायाम् अपि तु असमीयासाहित्ये अपि विशेषतया दृश्यते ।

## परिशीलितग्रन्थाः


मेधी कालिराम – असमीया व्याकरण आरु भाषातत्त्व
बरा सत्यनाथ – बहल व्याकरण
ईशावास्योपनिषद्
माधवदेव – भक्तिरत्नावली
चौधरी गर्गनारायण – बरगीत

भुयाँ श्रीसूर्यकुमार – असम बुरञ्जी
दण्डी – काव्यादर्शः